६। इति तट्टीका ॥ अश्वघ्नः ७ हयारिः ८ अश्वमारकः ९ शीतकुम्भः १० तुरङ्गारिः ११। इति रत्नमाला ॥ अश्वहा १२ वीरः १३ हयमारः १४ हयघ्नः १५ शतकुन्दः १६ अश्वरोधकः १७ वीरकः १८ कुन्दः १९ शकुन्दः २० श्वेतपुष्पकः २१ अश्वान्तकः २२ नखराङ्कः २३ अश्वनाशनः २४ स्थलकुमुदः २५ दिव्यपुष्पः २६ हरिप्रियः २७ गौरीपुष्पः २८ सिद्धपुष्पः २९। अस्य गुणाः। कटुत्वम्। तीक्ष्णत्वम्। कुष्ठकण्डूतिनाशित्वम्। व्रणार्त्तिविषविस्फोटकशमनत्वम्। अश्वमृतिप्रदत्वञ्च। इति राजनिर्घण्टः ॥ (श्वेतरक्तभेदेन यथा,—

"करवीरः श्वेतपुष्पः शीतकुम्भोऽश्वमारकः।
द्वितीयो रक्तपुष्पश्च चण्डातो लगुडस्तथा ॥
करवीरद्वयं तिक्तं कषायं कटुकञ्च तत्।
व्रणलाघवकृन्नेत्रकोपकुष्ठव्रणापहम्।
वीर्य्योष्णं क्रिमिकण्डूघ्नं भक्षितं विषवन्मतम्" ॥

इति भावप्रकाशः ॥ नागविशेषः। इति भारतम् ॥)

करवीरकः, पुं, (करवीर इव कायति प्रकाशते। कै+कः। करं वीरयतीति। कर+वीर विक्रान्तौ+ण्वुल्।) अर्ज्जुनवृक्षः। इति राजनिर्घण्टः ॥ खड्गः। इति शब्दमाला ॥ (करवीर एव स्वार्थे कन्।) करवीरः। विषभेदः। स तु करवीरस्य मूलम्। इति हेमचन्द्रः ॥

करवीरकन्दसंज्ञः, पुं, (करवीरकन्दसंज्ञया संज्ञा यस्य। करवीरकन्द इति संज्ञा यस्य वा।) तैलकन्दः। इति राजनिर्घण्टः ॥

करवीरभुजा, स्त्री, (करवीरस्य भुज इव शाखावत् भुजः शाखाऽस्याः।) आढ़कीवृक्षः। ।इति राजनिर्घण्टः ॥ अरहर इति भाषा ॥

करवीरी, स्त्री, (किरति क्षिपति राक्षसासुरादीन् इति। कॄ+अप्। करः तादृशः वीरः पुत्रो यस्याः। यद्वा कं सुखं राति ददातीति क+रा+कः। सुखप्रदः वीरपुत्रो यस्याः।) अदितिः। श्रेष्ठगवी। पुत्रवती। इति मेदिनी ॥

करशाखा, स्त्री, (करस्य शाखा इव।) अङ्गुली। इत्यमरः। २। ६। ८१ ॥ तासां परिमाणं यथा।

"अष्टभिस्तैर्भवेत् ज्येष्ठं मध्यमं सप्तभिर्यवैः।
कन्यसं षड्भिरुद्दिष्टमङ्गुलं मुनिसत्तम ॥
मानन्तु पार्श्वेन। षड्यवाः पार्श्वसम्मिताः। इति कात्यायनदर्शनात्"। इति तिथ्यादितत्त्वम् ॥ तत्पर्य्यायः। अग्रुवः १ अण्व्यः २ क्षिपः ३ विशः ४ शर्य्याः ५ रशनाः ६ धीतयः ७ अथर्य्यः ८ विपः ९ कक्ष्याः १० अवनयः ११ हरितः १२ स्वसारः १३ जामयः १४ सनाभयः १५ योक्त्राणि १६ योजनानि १७ धुरः १८ शाखाः १९ अभीशवः २० दीधितयः २१ गभस्तयः २२। इति द्वाविंशतिरङ्गुलिनामानि। इति वेदनिघण्टौ २ अध्यायः ॥

करशीकरः, पुं, (करात् करिशुण्डात् निःसृतः शीकरः। करस्य गजशुण्डस्य शीकरो वा।) हस्तिशुण्डनिर्गतजलकणा। तत्पर्य्यायः। वमथुः २। इत्यमरः। २। ८। ३७ ॥ (यथा रघुः। ७। ४८।

"उद्यन्तमग्निं शमयाम्बभूव-
गजा विविग्नाः करशीकरेण" ॥)

करशूकः, पुं, (करस्य शूकः सूक्ष्माग्र इव सूच्यग्र इव वा।) नखः। इति त्रिकाण्डशेषः ॥

करहाटः, पुं, (करेण किरणेन सूर्य्यस्येति यावत् हाट्यते दीप्यते इति। हट्+णिच्+कर्म्मणि घञ्।) पद्ममूलम्। मदनवृक्षः। इति मेदिनी ॥ महापिण्डीतरुः। इति राजनिर्घण्टः ॥

करहाटकः, पुं, (करहाट एव इति स्वार्थे कन्। करं हाटयतीति ण्वुल् वा।) मदनवृक्षः। इत्यमरः। २। ४। ५२ ॥ हस्तोयस्त्वर्थे स्त्री ॥

करामर्द्दः, पुं, (करं आमृद्नातीति। कर+आ+मृद्+अण्।) करमर्दवृक्षः। इति शब्दरत्नावली ॥ करम्चा इति भाषा ॥

कराम्बुकः, पुं, (कीर्य्यते क्षिप्यते। कॄ+कर्म्मणि अप्। करं अम्बु यस्मात् कप्।) कृष्णपाकफलवृक्षः। इति शब्दचन्द्रिका भरतधृतवाचस्पतिश्च ॥ पाणि आमला इति भाषा ॥

करात्लकः, पुं, (कीर्य्यते इति करं कीर्य्यमाणं अस्तं यतः। अस्त+कप्।) करमर्द्दकवृक्षः। इति राजनिर्घण्टः ॥

करायिका, स्त्री, (कराविव आचरति उड्डीनादिकाले करवल्लम्बमानत्वात्तथात्वम्। कर+आचारे क्यङ्। ततो+ण्वुल्+टाप् च।) बलाकापक्षी। क्षुद्रवकः। इति भूरिप्रयोगः ॥

करारोटः, पुं, (करे आरोटते दीप्यते। आ+रुट्+अच्।) अङ्गुरीयकम्। इति त्रिकाण्डशेषः ॥

करालं, क्ली, (कराय चक्षुरोगादिनाशाय अलति पर्य्याप्नोतीति। अल्+अच्।) कृष्णकुठेरकः। इति मेदिनी ॥ काल तुलसी इति भाषा ॥

करालः, पुं, (करं आलाति गृह्णाति। आ+ला+कः। कराय क्षेपाय अलति पर्य्याप्नोति वा।) सर्जरसयुक्ततैलम्। इति मेदिनी ॥ गर्जनतैल इति भाषा ॥ तैले घृते वा पक्ववेसवारः। इति पाकराजेश्वरः ॥ (क्वचित् क्लीवेऽपि दृश्यते। यथा,

"तप्तस्नेहे पचेत् पूर्व्वं वेसवारकसंज्ञकम्।
पाकप्रापितसौरभ्यं करालं सूदकैर्मतम्" ॥

गन्धर्व्वभेदः ॥ यथा, महाभारते। १। १२३। ५४।

"सद्वा बृहद्वा हंसः करालश्च महामनाः" ॥)

करालः, त्रि, (कराय क्षेपाय भयप्रदर्शनाय अलति पर्य्याप्नोति।) दन्तुरः। दाँता इति भाषा ॥ (यथा,

"कराल वदनां घोरां मुक्तकेशीं चतुर्भुजाम्"।

इति च।मुण्डाध्यानम् ॥) तुङ्गः। उच्च इति भाषा ॥ भीषणः। इति मेदिनी ॥ भयानक इति यावत् ॥ (यथा, रघुः। १२। ९८।

"तद्योम्नि शतधा भिन्नं ददृशे दीप्तिमन्मुखम्।
वपुर्महोरगस्येव करालफणमण्डलम्" ॥)

करालकः, पुं, (कराल एव स्वार्थे कन्। करालवत् कायति वा।) कृष्णतुलसी। इति रत्नमाला ॥ करालशब्दार्थश्चात्र ॥

करालत्रिपुटा, स्त्री, (करालानि त्रीणि पुटानि यस्याः।) लङ्काधान्यम्। इति राजनिर्घण्टः ॥

कराला, स्त्री, (करालनाम्ना नाम यस्याः।) शारिवा। अनन्तमूल इति ख्याता। इति रत्नमाला ॥ (शारिवाशब्देऽस्या गुणा ज्ञातव्याः ॥)

करालिकः, पुं, (करालां करसदृशशाखानां आलिः श्रेणिर्यत्र। कप्।) वृक्षः। इति हेमचन्द्रः ॥

कराली, स्त्री, (कराल+गौरादित्वात् ङीष्।) अग्नेः सप्तजिह्वान्तर्गतजिह्वाविशेषः। इति जटाधरः ॥ (यथा मुण्डकोपनिषदि। १। २। ४।

"काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा।
स्फुलिङ्गिनी विश्वरूपी च देवी
लेलायमाना इति सप्त जिह्वाः' ॥)

करिकणावल्ली, स्त्री, (करिकणाया इव वल्ली।) चविकावृक्षः। इति राजनिर्घण्टः। चइ इति भाषा ॥ (चविकाशब्देऽस्या विशेषो ज्ञेयः ॥)

करिकुसुम्भः, पुं, (करीति नागकेशरःतद्वत् कुसुम्भः।) नागकेशरचूर्णकम्। इति हारावली ॥

करिगर्ज्जितं, क्ली, (करिणः गर्ज्जितं गर्ज्जनं। करि+गर्ज्ज+भावे क्तः।) हस्तिगर्जनम्। तत्पर्य्यायः। बृंहितम् २। इत्यमरः। २। ८। १०७ ॥

करिजः, पुं, (करिणो जायते इति। करि+जन्+कर्त्तरि डः।) हस्तिशिशुः। इति शब्दमाला ॥

करिणी, स्त्री, (करिन्+स्त्रियां ङीप्।) हस्तिनी। तत्पर्य्यायः। धेनुका २ वशा ३। इत्यमरः। २। ८। ३६ ॥ करेणूः ४ करेणुः ५ करेणुका ६ रेणुका ७ वासिता ८ वासा ९ हस्तिनी १०। इति शब्दरत्नावली ॥ कटम्भरा ११ पुष्करिणी १२ कथा १३ गणिका १४ गजयोषित् १५। इति जटाधरः ॥ पद्मिनी १६ इत्यमरटीका ॥ (यथा भागवते। ४। ९। ५३।

"आरोप्य करिणीं हृष्टः स्तूयमानोऽविशत्पुरम्" ॥)

करिदारकः, पुं, (करिणं दृणाति हिनस्ति दारयतीत्यर्थः। दॄ विदारे+ण्वुल्।) सिंहः। इति शब्दरत्नावली ॥

करिपत्रं, क्ली, (करिणः कर्णवत् पत्रं यस्य।) तालीशपत्रम्। इति राजनिर्घण्टः ॥

करिपिप्पली, स्त्री, (करिसंज्ञया संज्ञा यस्याः पिप्पल्याः सा। करिनामिका पिप्पली।) गजपिप्पली। इत्यमरः। २। ४। ९७ ॥

करिपोतः, पुं, (करिणः पोतः शिशुः।) करिशावकः। इति हलायुधः। २। ६९ ॥

करिबन्धः, पुं, (करी बध्यते बध्यतेऽत्र। यद्वा करिणं हस्तिनं बध्नाति अत्र। बन्ध+अधिकरणे घञ्।) हस्तिबन्धनस्तम्भः। तत्पर्य्यायः। प्रारब्धिः २। इति हारावली ॥

करिमाचलः, पुं, (मच शाठ्यदम्भयो रितिधातोः भावे घञ्। करिणि हस्तिवधविषये माचं शाठ्यं लाति गृह्णातीति। ला+कः।) सिंहः। इति त्रिकाण्डशेषः ॥

करिमुखः, पुं, (करिणो मुखमिव मुखं यस्य।) गणेशः। इति त्रिकाण्डशेषः ॥

करिरः, पुं, क्ली, (कॄ+इरन्।) करीरः। इति शब्दरत्नावली ॥